पर्य्याय:। माषक: २ माष: ३। इत्यमरभरतौ ॥ हेम: ४ धानक: ५। स च मागधमाने सुश्रुतमते ५ गुञ्जापरिमाणम्। चरकमते ६।८ गुञ्जापरिमाणम्। कालिङ्गमाने सुश्रुतमते ५।७।८ गुञ्जापरिमाणम्। इति भावप्रकाश: ॥ वैद्यकान्तरे १० गुञ्जापरिमाणम्। यथा,—

"गुञ्जाभिर्दशभिर्माष: शाणो माषचतुष्टयम्।"

इति वैद्यकपरिभाषा ॥

( माषार्थे यथा,—

"द्वात्रिंशन्माषकैर्माषश्चरकस्य तु तै: पलम्।
चरकार्द्धपलोन्मानं चरके दशरक्तिकै:।
माषै: पलं चतु:षष्ट्या यद्भवेत्तदुदीरितम् ॥"

इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे।)

ज्योति:स्मृतिमते १२ गुञ्जापरिमाणम्। यथा,

"पलं तु लौकिकैर्मानै: साष्टरक्तिद्विमाषकम्।
तोलकत्रितयं ज्ञेयं ज्योतिर्ज्ञै: स्मृतिसम्मतम् ॥"

इति तिथ्यादितत्त्वधृतवचनेन पलं अष्टरक्तिकाधिकमाषद्वयाधिकतोलकत्रयम्। एतेन माषकपरिमाणं द्वादशरक्तिकं भवति ॥ * ॥ मूर्ख:। त्वग्दोषभेद:। इति मेदिनी षे, २१ ॥

माषक:, पुं, ( माषप्रकार:। माष+"स्थूलादिभ्य: प्रकारवचने कन्।" ५।४।३। इति कन्।) मासक:। पञ्चरक्तिकपरिमाणम्। यथा। गुञ्जा: पञ्चाद्यमाषक:। इत्यमर: ॥

"दशार्द्धगुञ्जं प्रवदन्ति माषं
माषाह्वयै: षोडशभिश्च कर्षम् ॥"

इति लीलावती च ॥

"षड्भिस्तु रक्तिकाभि: स्यान्माषको हेमधानकौ।
माषो गुञ्जाभिरष्टाभि: सप्तभिर्वा भवेत् क्वचित् ॥"

इति भावप्रकाश: ॥

( व्रीहिविशेष:। तदर्थे विषयो यथा,—

"द्वात्रिंशन्माषकैर्माष:।"

परिमाणार्थे यथा,—

"—————सुश्रुतस्य तु माषक:।
द्वादशभिर्धान्यमाषैश्चतु:षष्ट्या तु तै: पलम् ॥"

इत्युभे वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे ॥)

माषकलाय:, पुं, ( माषसंज्ञ: कलाय: शाकपार्थिववत् समास:।) स्वनामख्यातशस्यम्। यथा। कलायशब्दो विशेषे सामान्ये च अत एव माषकलाय इत्यादि प्रयोग:। इत्यमरटीकायां भरत: ॥

माषपर्णी, स्त्री, ( माषस्य पर्णमिव पर्णं यस्या:। ततो ङीष्।) वनमाष:। माषाणी इति भाषा। तत्पर्य्याय:। हयपुच्छी २ काम्बोजी ३ महासहा ४। इत्यमर:। २।४।१३८ ॥ सिंहपुच्छी ५ ऋषिप्रोक्ता ६ कृष्णवृन्ता ७ पाण्डुलोमशपर्णिनी ८। इति रत्नमाला ॥ आर्द्रमाषा ९ मांसमाषा १० मङ्गल्या ११ हयपुच्छिका १२ हंसमाषा १३ अश्वपुच्छा १४ पाण्डुरा १५ माषपर्णिका १६ कल्याणी १७ वज्रमूली १८ शालिपर्णी १९ विसारिणी २० आत्मोद्भवा २१ बहुफला २२ स्वयम्भू: २३ सुलभा २४ घना २५ सिंहविन्ना २६ विशाखिका २७। अस्या गुणा:। तिक्तरसत्वम्। शुष्यत्वम्। दाहज्वरापहत्वम्। शुक्रवृद्धिकारित्वम्। बल्यत्वम्। शीतलत्वम्। पुष्टिवर्द्धनत्वञ्च। इति राजनिर्घण्ट: ॥ अपि च भावप्रकाशे।

"माषपर्णी सूर्य्यपर्णी काम्बोजी हयपुच्छिका।
पाण्डुलोमशपर्णी च कृष्णवृन्ता महासहा ॥
माषपर्णी हिमा तिक्ता रूक्षा शुक्रबलाशकृत्।
मधुरा ग्राहिणी शोषा वातपित्तज्वरास्रजित् ॥"

माषभक्तबलि:, पुं, ( माषस्य भक्तस्य तद्युक्तो बलि:।) माषतण्डुलदधिमिश्रितपूजोपहारविशेष:। अत्र केचित् हरिद्राघृतमध्वपि मिश्रयन्ति। यथा। एष माषभक्तबलि:।

"ॐ जय त्वं कालि! सर्व्वेशे सर्व्वभूतसमावृते।
रक्ष मां निजभूतेभ्यो बलिं गृह्ण शिवप्रिये! ॥"

ॐ काल्यै नम:। प्रार्थनामन्त्रो यथा,—

"ॐमातर्मातर्व्वरे दुर्गे सर्व्वकामार्थसाधिनि!।
अनेन बलिदानेन सर्व्वान् कामान् प्रयच्छ मे ॥"

इति कृत्यतत्त्वम् ॥

भूतेभ्योऽप्ययं बलिर्देय: ॥

माषवर्द्धक:, पुं, ( माषं वर्द्धयतीति। वृध+णिच्+ण्वुल्।) स्वर्णकार:। इति शब्दमाला ॥

माषश:, [स्] व्य, प्रतिमाषम्। माषं माषं ददाति इत्यर्थे शस्प्रत्ययेन निष्पन्नम्। इति सिद्धान्तकौमुदी ॥

माषाद:, पुं, ( माषमत्तीति। अद्+अण्।) कच्छप:। इति शब्दरत्नावली ॥ माषभक्षके, त्रि ॥

माषीणं, माष्यं, } क्ली, (माषाणां भवनं क्षेत्रम्। माष+"विभाषा तिलमाषोमाभङ्गाणुभ्य:।" ५।२।४। इति यत् पक्षे खञ्।) माषक्षेत्रम्। यथा,—

"तिल्यतैलीनवन्माषोमाणुभङ्गाद्विरूपता।"

इत्यमर: ॥

यथा तिलस्य क्षेत्रं तिल्यं तैलीनञ्च भवति तथा माषादीनामपि द्विरूपता द्वैरूप्यं भवति। इति तट्टीकायां भरत: ॥

मास्, पुं, ( माङ+माने "सर्व्वधातुभ्योऽसुन्।" ४।१८८। इत्यसुन्।) चन्द्र:। (यथा, ऋग्वेदे। १०।१२।७।

"सूर्य्ये ज्योतिरदधुर्मास्यक्तून्
परिद्योतनिं चरतो अजस्रा ॥"

"मासि चन्द्रमसि।" इति तद्भाष्ये सायण: ॥ मीयतेऽनेनेति। मा+"चन्द्रे मो डित्।" उणा० ४।२२७। इत्यत्र "बाहुलकात् केवलादपि मोऽसि:।" इत्युज्ज्वलोदत्तोक्तेरसि:।) मास:। इति मेदिनी। से, ७ ॥ अस्य प्रथमैकवचनान्तरूपं मा: ॥ (यथा, मनौ। २।३४।

"चतुर्थे मासि कर्त्तव्यं शिशोर्निष्क्रमणं गृहात्।
षष्ठेऽन्नप्राशनं मासि यद्वेष्टं मङ्गलं कुले ॥"

मांसे, क्ली। यथा, ऋग्वेदे। ५।२९।८।

"त्रीयच्छता महिषाणामघो
मास्त्रीसरांसि मघवा सोम्यापा:।"

"मा: मांसानि।" इति तद्भाष्ये सायण: ॥)

मास:, पुं, (मस् परिमाणे+भावे घञ्।) माषपरिमाणम्। इत्यमरटीकायां भरत:। माष इति भाषा ॥ ( मस्यते परिमीयते असावनेनेति मस्+घञ्।) शुक्लकृष्णपक्षद्वयात्मक: काल:। स च पौषमाघादिद्वादशसंज्ञक:। इत्यमर:। १।४।१२ ॥ मासश्चन्द्रस्तस्यायं मास: अण्। चान्द्रमासस्येयं व्युत्पत्ति:। सौरादिषु तु मस्यते परिमीयतेऽनेनासौ वा मास:। मसियं ई परिमाणे घञ्। मा: सान्तोऽपि। मास्तु मासोऽपि दृश्यते। इति चक्रु:। इति भरत: ॥ * ॥ स्मृतिमतेऽपि पौषादिद्वादशसंज्ञक:। यथा,—

"चक्रवत् परिवर्त्तेत सूर्य्य: कालवशाद्यत:।
अत: सांवत्सरं श्राद्धं कर्त्तव्यं मासचिह्नितम् ॥
मासचिह्नन्तु कर्त्तव्यं पौषमाघाद्यमेव हि।
यतस्तत्र विधानेन स मास: परिकीर्त्तित: ॥"

इति लघुहारीत: ॥

कार्त्तिकादिद्वादशसंज्ञकोऽपि। यथा,—

"अन्त्योपान्त्यौ त्रिभौ ज्ञेयौ फाल्गुनश्च त्रिभो मत:।
शेषा मासा द्विभा ज्ञेया: कृत्तिकादिव्यवस्थया ॥"

स च चैत्रादिद्वादशसंज्ञकश्च। यथा उक्तं ब्रह्मपुराणम्।

"चैत्रे मासि जगद्ब्रह्मा ससर्ज्ज प्रथमेऽहनि।
शुक्लपक्षे समग्रन्तु तदा सूर्य्योदये सति ॥
प्रवर्त्तयामास तदा कालस्य गणनामपि।
ग्रहान्नागानृतून् मासान् वत्सरान् वत्सराधिपान् ।"

इत्यनेन मासवत्सराणां चान्द्रत्वमुक्तम्।

ब्रह्मसिद्धान्तेऽपि।

"चैत्रसितादेरुदयाद्भानोर्द्दिनमासवर्षयुगकल्पा:।
सृष्ट्यादौ लङ्कायामिह प्रवृत्ता दिनैर्व्वस ।"

चैत्रसितादेश्चैत्रशुक्लप्रतिपदस्तामारभ्येत्यर्थ: ॥ अपि च।

"मीनादिस्थो रविर्येषामारम्भप्रथमक्षणे।
भवेत्तेऽब्दे चान्द्रमासाश्चैत्राद्या द्वादश स्मृता: ॥"

चान्द्रसावनसौरनाक्षत्रभेदेन स च चतुर्व्विध:। शुक्लप्रतिपदादिदर्शान्तश्चान्द्र:। तत्र चान्द्रोऽपि द्विविध:। शुक्लप्रतिपदादिदर्शान्तो मुख्य:। कृष्णप्रतिपदादिपौर्णमास्यन्तो गौण:। यत्किञ्चित्त्रिंशत्तिथ्यात्मकश्चेति द्विविधो गौण:। त्रिंशदहोरात्रात्मक: सावन:। आदित्यैकराशिभोगावच्छिन्न: सौर:। सप्तविंशतिनक्षत्रावच्छिन्नस्त्रिंशन्नाक्षत्रदिनात्मकश्च नाक्षत्र:। तथा च ब्रह्मसिद्धान्ते।

"चान्द्र: शुक्लादिदर्शान्त: सावनस्त्रिंशता दिनै:।
एकराशौ रविर्यावत् कालं मास: स भास्कर: ॥